# संस्कृतवार्ता:

**दिनाङ्क :- 07.02.2025** **सायम् - 06:20**

**मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी सोमवासरे फ्रांसदेशस्य त्रिदिवसीययात्रायै प्रस्थास्यति।
- अद्य लोकसभायां प्रवर्तमान-आगामि-वर्षस्य सामान्य आयव्ययप्रत्रकस्य विषये चर्चा अभवत्।
- दिल्लीनिर्वाचनमतगणना श्वः भविष्यति।
- कृषिमन्त्री शिवराजसिंह-चौहानः अद्य ईएफपीओ इति विषये उक्तवान्।
- भारतीय-रिजर्व-बैंकेन अर्थव्यवस्थां सुदृढी कर्तुं संवर्धयितुं च प्रबजं प्रतिपादितम्।
- अष्टत्रिंशत् तमीये सूरजकुंड-अन्ताराष्ट्रिय-शिल्प-मेलकं अद्य फरीदाबादे उद्घाटितम्। अत्र द्वि-चत्वारिंशत् देशानां षट शत् प्रतिभागिन: भागं निर्वहन्ति।

**प्रधानमन्त्री-यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी सोमवासरे फ्रांसदेशस्य त्रिदिवसीययात्रायै प्रस्थास्यति। अस्मिन् यात्राकाले मोदीमहोदयः पेरिसनगरे फ्रांसदेशस्य राष्ट्रपतिना इमैनुएल मैक्रों इत्यनेन सह आर्टिफिसियल इंटेलिजेंस शिखर सम्मेलनस्य सह-अध्यक्षतां विधास्यति। विदेशसचिवः विक्रममिस्री अद्य नवदिल्ल्यां एतां सूचनां दत्तवान्। सः अवदत् यत् प्रधानमन्त्री अमेरिकीराष्ट्रपतिना डोनाल्ड ट्रम्पेन सह द्विपक्षीय-गोष्ठीयाम् अपि अस्मिन् मासे द्वादश, त्रयोदश दिनाङ्केषु अमेरिकादेशं प्रति गमिष्यति।

**लोकसभा – बजटसत्र**

अद्य लोकसभायां प्रवर्तमान-आगामि-वर्षस्य सामान्य आयव्ययप्रत्रकस्य विषये चर्चा अभवत्। विमर्शे भागं गृहीत्वा भारतीयजनतापार्टीति दलस्य रावराजेन्द्रसिंहः केन्द्रीयआयव्ययप्रत्रकस्य प्रशंसाम् अकरोत्, तस्मिन् निर्धनानां, कृषकाणां, महिलानां च हितस्य पालनं कृतम् इति अवदत्। सः उक्तवान् यत् सर्वकारः कृषकाणां कल्याणं प्रति केन्द्रितः अस्ति तथा च अस्मिन् दिशि अनेकानि उपक्रमाः करोति। देशे वर्धमानपर्यटन-विमान-उद्योगानाम् विषये अपि सः चर्चा कृतवान्। समाजवादीपार्टीतिदलपक्षस्य शिवपालसिंहः केन्द्रीय-आयव्ययप्रत्रकस्य विषये आलोचनां कृतवान् यत् राष्ट्रे कृषकाः स्वस्य उत्पादानाम् उचितमूल्यानि न प्राप्नुवन्ति। तृणमूलदलस्य-अभिषेकबनर्जी एलपीजी-सिलिण्डर-इत्यस्य मूल्यानां वृद्धेः विषयं उत्थापितवान् । इतोपूर्वं चर्चायाः आरम्भं कुर्वन् काङ्ग्रेसदलस्य धर्मवीरगान्धी आरोपितवान् यत् केन्द्रीयआयव्ययप्रत्रकस्य राष्ट्रस्य सम्मुखे उपस्थिताः कृषिसमस्यायाः समाधानं कर्तुम् असफला । एतस्योपरि चर्चा प्रचलति।

**दिल्ली-विधानसभा**

दिल्लीनिर्वाचनमतगणना श्वः भविष्यति। दिल्लीविधानसभानिर्वाचनस्य मतगणनायाः सर्वा: सज्जा: परिपूरिता: । मतदानस्य गणना प्रातः अष्टवादनत: आरभ्यते, मध्याह्न द्वादश वादनपर्यन्तं परिणामः अपेक्षितः अस्ति। प्रथमं डाकमतपत्राणां गणना भविष्यति, तदनन्तरं ईवीएम यन्त्राणां गणना भविष्यति। दिल्लीप्रदेशस्य मुख्यनिर्वाचनाधिकारी आर. ऐलिस वाज इत्यनेन उक्तं यत्, दिल्लीप्रदेशे एकादश जनपदेषु गणनाप्रक्रियायाः कृते नवदशगणनाकेन्द्राणि स्थापितानि सन्ति। अस्य कृते प्रायः पञ्चसहस्राणि कर्मचारिणः अन्ये च सहायककर्मचारिणः नियोजिताः प्रशिक्षिताः च सन्ति । निर्वाचनायोगेन स्वस्य अन्तर्जाल www.eci.gov.in इत्यस्य माध्यमेन प्रवृत्तीनां परिणामानां च प्रसारार्थं सुदृढं, पूर्णतया सुरक्षितं च आधारभूतसंरचनं निर्मितम् अस्ति। गणनाकेन्द्रेषु त्रिस्तरीयसुरक्षाव्यवस्था कृता अस्ति। आयोगस्य, पुलिसाधिकारिणां च नित्यनिरीक्षणे सशक्तकक्षेषु ईवीएम- मतदानयन्त्राणि अपि स्थापितानि सन्ति।

**शिवराजसिंह-चौहानः**

कृषिमन्त्री शिवराजसिंह-चौहानः अद्य उक्तवान् यत् गतवर्षस्य अन्ते यावत् चतुःसहस्रत्रिशताधिकाः कृषिउत्पादकसंस्थाः-एफपीओ-संस्थाः ई-अभिधान पोर्टल-माध्यमेन पञ्जीकरणम् अस्य पोर्टल इत्यनेन माध्यमेन भवति। राज्यसभायां प्रश्नसमये पूरकप्रश्नानां उत्तरं दत्त्वा कृषिमन्त्री उक्तवान् यत् सम्पूर्णे राष्ट्रे अद्यावधि दशसहस्राधिकाः एफपीओ-संस्थाः निर्मिताः सन्ति।

**भारतीय-रिजर्व-बैंकम्**

भारतीय-रिजर्व-बैंकेन अर्थव्यवस्थां सुदृढी कर्तुं संवर्धयितुं च पञ्चवर्षानन्तरं नीतिगत-रेपो-दरं पञ्चविंशतिः आधार-अंकैः सह अपचितम् जातम्। अपि च दरमिदं सार्ध-षड् प्रतिशत-तः न्यूनीभूय सपाद-षट् प्रतिशतं निर्धारितम्1 रेपो दरं एतादृशं कुसीद-दरं विद्यते ये भारते वाणिज्यिक-बैंकं रिजर्व-बैंकात् धनं ऋण-रूपेण स्वीकुर्वन्ति। केन्द्रीय बैंकस्य गर्वनर-संजयमल्होत्रा वर्येण मौद्रिक-नीति-समित्याः -एमपीसी एतस्याः त्रि-दिवसीय-उपवेशनानन्तरं अद्य मुम्बय्यां घोषणेयं विहितास्ति। एतस्याः फलस्वरूपेण, स्थाई-निवेशित-सुविधा-एसडीएफ इत्यस्य दरं षट् प्रतिशतम्, मार्जिनल-स्थायी-सुविधा-एमएसएफ दरं च, सार्ध षट् प्रतिशतं निर्धारितम्। इदं प्रवर्तमान-आगामि वर्षाय च कृते वर्तते।

**लोकसभा-मोर्टलिटी दरम्**

प्रशासनेन अद्य प्रतिपादितं यत् जनजातीय-क्षेत्रेषु स्वास्थ्य-सुविधाः भद्रीकरणाय प्रशासनं विशिष्टं ध्यानं प्रददाति। लोकसभायां पूरक-प्रश्नानां समुदतरन् स्वास्थ्य-परिवार-कल्याण मन्त्री जगतप्रकाश नड्डा भणितवान् यत् राज्य-केन्द्रशासित-प्रदेशानां सर्वकारः सक्रिय-समर्थनेन विशिष्ट-जनजातीय-क्षेत्राणां प्रत्येकस्मिन् नागरिकाय श्रेष्ठ-भद्रतम-चिकित्सा-सेवां सुविधां च सुनिश्चेतुं प्रयासरतः विद्यते। इतः प्राक् स्वास्थ्य-परिवार-कल्याण-राज्यमन्त्रिणा अनुप्रिया पटेलेन प्रोक्तं यत् विगत-त्रिंशत् वर्षेषु मातृ-मृत्यु-दरं-एमएमआर इति न्यूनीभूय वैश्विक-स्तरे द्वि-चत्वारिंशत् प्रतिशतं स्थिता जाता।

भारतदेशे च इदं त्रि-अशीति-प्रतिशतं विद्यते। जे.पी.नड्डा वर्येण इदमपि प्रोक्तं यत् मातृ-मृत्युदरं ऊनसप्तति-प्रतिशत-तः वैश्विक-स्तरे पञ्चाशत् तमं न्यूनीभूता जातास्ति। मन्त्रिणा प्रकाशितं यत् प्रकरणामिदं आलक्ष्य प्रशासनेन बहवः सार्थक-प्रयासाः अखिल-देशे अस्मिन् दिशि उत्थापिताः।

**एनडीए-एमपी-पीएम**

बिहारराज्यस्य एनडीए सांसदैः अद्य संसद-भवने प्रधानमन्त्रिणं नरेन्द्रमोदिनं मिलितवन्तः। सम्भाषणकाले भारतीयजनतापार्टीति दलस्य सांसदाः, केन्द्रीयमन्त्री गिरिराजसिंहः, राजीवरंजनसिंहः, चिरागपासवानः अपि उपस्थिताः आसन्। सम्भाषणानन्तरं वार्ताहरैः साकं सम्वदन् गिरिराज सिंहः प्रोक्तवान् यत् बिहार-राज्ये आय-व्यय-पत्रक-सम्बद्ध-घोषणानां कृते ते प्रधानमन्त्रिणं प्रति आभार-युताः वर्तन्ते।

**सूरजकुण्ड-मेलकम्**

केन्द्रीय मन्त्रिणा गजेन्द्र-सिंह-शेखावतेन हरियाणा-राज्यस्य मुख्यमन्त्रिणा नायबसिंहसैनी वर्येण च अद्य फरीदाबादे अष्टत्रिंशत् तमीये सूरजकुंड-अन्ताराष्ट्रिय-शिल्प-मेलके उद्घाटन-विधा प्रपूरिता। वर्षेऽस्मिन् मेलके मित्रराज्यानि-मध्यप्रदेश, ओडिशा च वर्तेते।

मेलकेऽस्मिन् मिस्र-इथियोपिया, सीरिया, अफगानिस्तान, बेलारूस, देशान् समेत्य आहत्य द्वि चत्वारिंशत् देशानां षट् शत्-प्रतिभागिनः

भागं निर्वहन्ति। मेलकस्य उद्देश्यं हस्तशिल्प, हस्तोद्योगं च विवर्धनम् अवसरेऽस्मिन् श्री शेखावतेन मेलकं एकता-रचनात्मकतायाः प्रतीकं प्रतिपादितम्। अवसरेऽस्मिन् केन्द्रीय संस्कृति मन्त्रिणा शेखावतेन प्रोक्तं यत् मेलकमिदं 'एक भारत-श्रेष्ठ भारत' इति विचारं पूर्णतया प्रपूरयति। जन-साधारणाय कृते मेलकमिदं फरवरी त्रयोविंशति दिनाकं यावत् प्रातः दश-वादनतः, अष्ट-वादन-पर्यन्तं उद्घाटितं विद्यते।

**बंग्लादेश: एमईए**

भारतदेशेन प्रबलं प्रतिपादितं यत् बांग्देलादेशे गत रात्रौ अनियन्त्रित-जन सम्मर्देन किशोरगंज - जनपदे बंगबंधु-शेख-मुजीबुर-रहमानस्य भित्तिचित्राणि, प्रतिमाः च ध्वस्तीकृताः। वार्ताहर- विवरणानुसारेण विदेश-मन्त्रालयस्य प्रवक्त्रा रणधीर जायसवालेन भणितं यत् शेख मुजीबुर-रहमानस्य ऐतिहासिक-निवासः, वीराणां प्रतिष्ठानानि, बांग्लादेशीय जनैः, ध्वस्तीकृताः।

**ट्रम्पः**

अमेरिकीय राष्ट्रपतिना डोनाल्ड ट्रम्पेण इस्राइल अमेरिका देशयोः आधारहीन-क्रियाकलापानां विरुद्ध्य अन्ताराष्ट्रिय आपराधिक-न्यायालय (आईसीसी) इत्यस्य प्रकरणस्य सन्दर्भे निर्णयो एकः हस्ताक्षरितः। देशद्वयोः आपराधिक-आक्रामक स्थितिं सम्मुखीकर्तुम् अमेरिकादेशेन निर्णयोऽयं विहितः। ट्रम्पेण प्रतिक्रियेयं वाशिंगटने नेतन्याहुः यात्रानन्तर प्रकटिता वर्तते।

**उत्तराखण्ड राष्ट्रिय-क्रीडा**

उत्तराखण्डे हल्द्वानी-स्थले इंदिरागांधी स्पोर्ट्स – काम्प्लेक्स-खेलप्रांगणे प्रचल्यमाणेषु अष्टत्रिंशत्-तमीयेषु राष्ट्रिय-क्रीडासु अद्य सायंकाले उत्तराखण्डस्य प्रतिस्पर्धा पुरुष फुटबॉल-इत्यस्य निर्णायक द्वन्द्वे केरल-राज्ये साकं भविष्यति। प्रतिस्पर्धेयं षड्वादनत: प्रारप्स्यति। असम राज्येन अद्य अन्तिम-स्पर्धायां दिल्लीं पराभूय कांस्य-पदकं विजितम्। लॉन टेनिस स्पर्धायां गुजरात-राज्येन, महाराष्ट्रं पराजित्य महिला-दल-स्पर्धाया: स्वर्ण-पदकं विजितम्। पुरुष-दल-स्पर्धायां तमिलनाडु राज्येन कर्णाटकं पराभूय स्वर्ण-पदकं विजितम्। एवम्प्रकारेण एकत्रिंशत् सर्विसेज, त्रयोदश-रजत, द्वादश-कांस्य-पदकानि विजित्य अंक-तालिकायां शीर्ष-स्थाने वर्तते। कर्णाटक: त्रिंशत् स्वर्ण, एकादश रजत, पञ्चदश कांस्य, पदकै: सह द्वितीय-स्थाने विद्यते। महाराष्ट्र प्रदेशेन च नवदश स्वर्ण, अष्टत्रिंशत् रजत् सप्तत्रिंशत् कांस्य पदकानि संप्राप्य तृतीय स्थाने विद्यते।

**।। ति वार्ता:।।**